# Shri Kartikeyastotrakadambam

# श्रीकार्तिकेयस्तोत्रकदम्बम्

## Document Information

Text title : kArtikeyastotrakadambam

File name : kArtikeyastotrakadambam.itx

Category : subrahmanya, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_subrahmanya

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Shri Kartikeyastotrakadambam

# श्रीकार्तिकेयस्तोत्रकदम्बम्

श्रीमयूराचलक्षेत्रे - (कुन्नक्कुड्यपरनामके)
कार्तिकेय करुणामृतराशे कार्तिके यतहृदा तव पूजा ।
पूर्तये भवति वाञ्छितपङ्क्तेः कीर्तये च रचिता मनुजेन ॥ १॥

अत्यन्तपापकर्मा मत्तुल्यो नास्ति भूतले गुह भो ।
पूरयसि यदि मदिष्टं चित्रं लोकस्य जायते भूरि ॥ २॥

कारागृहस्थितं यश्चक्रे लोकेशमपि विधातारम् ।
तमनुल्लङ्घितशासनमनिशं प्रणमामि षण्मुखं मोदात् ॥ ३॥

नाहं मन्त्रजपं ते सेवां सपर्यां वा ।
नैसर्गिक्या कृपया मदभीष्टं पूरयाशु तद्गुह भो ॥ ४॥

निखिलानपि मम मन्तून् सहसे नैवात्र संशयः कश्चित् ।
यस्मात्सहमानसुतस्त्वमसि कृपावारिधे षडास्य विभो ॥ ५॥

यदि मद्वाञ्छितदाने शक्तिर्नास्तीति षण्मुख ब्रूषे ।
तदनृतमेव स्यात्ते वाक्यं शक्तिं दधासि यत्पाणौ ॥ ६॥

मयूरस्य पत्रे प्रलम्बं पदाब्जं दधानंककुद्येव तस्यापरं च ।
सुरेन्द्रस्य पुत्र्या च वल्ल्या च पार्श्वद्वयं
भासयन्तं षडास्यं भजेऽहम् ॥ ७॥

विवेकं विरक्तिं शमादेश्च षट्कं मुमुक्षां च दत्त्वा षडास्याशु मह्यम् ।
विचारे च बुद्धिं दृढां देहि
वल्लीसुरेन्द्रात्मजाऽऽश्लिष्टवर्ष्मन्नमस्ते ॥ ८॥

सुरेशानपुत्रीपुलिन्देशकन्यासमाश्लिष्टपार्श्वं कृपावारिराशिम् ।
मयूराचलाग्रे सदा वासशीलं सदानन्ददं नौमि षड्वक्त्रमीशम् ॥ ९॥

स्वभक्तैर्महाभक्तितः पक्वदेहान्तमानीय दूरात्पुरा स्थापितान्यः ।

क्षणात्कुक्कुटादीन् पुनः प्राणयुक्तान् करोति स्म तं भावयेऽहं षडास्यम् ॥ १०॥

रवजितपरपुष्टरव स्वरधिपपुत्रीमनोऽब्जशिशुभानो ।
पुरतो भव मम शीघ्रं पुरहरमोदाब्धिपूर्णिमाचन्द्र ॥ ११॥

शतमखमुखसुरपूजित नतमतिदानप्रचण्डपदसेव ।
श्रितजनदुःखविभेदव्रतधृतकङ्कण नमोऽस्तु गुह तुभ्यम् ॥ १२॥

वृष्टिं प्रयच्छ षण्मुख मय्यपि पापे कृपां विधायाशु ।
सुकृतिषु करुणाकरणे का वा श्लाघा भवेत्तव भो ॥ १३॥

महीजलाद्यष्टतनोः पुराणां हरस्य पुत्र प्रणतार्तिहारिन् ।
प्रपन्नतापस्य निवारणाय प्रयच्छ वृष्टिं गुह षण्मुखाशु ॥ १४॥

पादाब्जनम्राखिलदेवताले सुदामसम्भूषितकम्बुकण्ठ ।
सौदामनीकोटिनिभाङ्गकान्ते प्रयच्छ वृष्टिं गुह षण्मुखाशु ॥ १५॥

शिखिस्थिताभ्यां रमणीमणिभ्यां पार्श्वस्थिताभ्यां परिसेव्यमानम् ।
स्वयं शिखिस्थं करुणासमुद्रं सदा षडास्यं हृदि भावयेऽहम् ॥ १६॥

भूयाद्भूत्यै महत्यै भवतनुजननश्चूर्णितक्रौञ्चशैलो
लीलासृष्टाण्डकोटिः कमलभवमुखस्तूयमानात्मकार्तिः ।
वल्लीदेवेन्द्रपुत्रीहृदयसरसिजप्रातरादित्यपुञ्जः
कारुण्यापारवारान्निधिरगतनयामोदवाराशिचन्द्रः ॥ १७॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितं श्रीकार्तिकेयस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Kartikeyastotrakadambam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*